तुष्ठितं स्यादिति तर्कयितुं शक्यते होलाकाया नित्यत्वे मानाभावेन काम्यत्वात्। न हि सर्वमेव श्रुतिविहितं काम्यं सर्वैः सद्भिरनुष्ठीयते न वैकस्य कर्त्तुर्विधानमन्यस्य तन्निषेधयति येनाप्राच्यानां निषिद्धाचरणेनानिष्टजनकतासाधनार्थं तत्पदमर्थवत् स्यात्। अत च शास्त्रदीपिकाधिकरणमालादायभागप्रभृतिषु प्राच्यानामिति पाठः। प्राच्यास्तत्र शास्त्रीयाः ते च सुमेरुलङ्कयोर्मध्ये या रेखा ज्योतिःशास्त्रादौ प्रसिद्धा तस्याः पूर्वदेशीयाः प्राच्याः न तु गौडदेशावधिकपूर्वदेशीयाः। तस्याः पश्चिमदेशीयास्तु पाश्चात्याः। एतेन प्रतीच्यानां तथाचरणमिति स्वदेशाभिप्रायेणैव गौडीयेनोदीच्येन लिखितं तच्चेयं गौडीयानामेव श्रुतिकल्पनम् अप्रत्यक्षवेदानां तथा चाव्यवस्थितश्रुतिकल्पना स्यात् न चायमपि दोषः विशेषकल्पने भविष्यति तथा सति पार्थसारथिमिश्रादिभिर्निबन्धृभिरयमप्युद्भावितः स्यात् न चैवम्। तस्माज्ज्योतिरादिशास्त्रप्रसिद्धप्राच्यादिमादायैवेयमाशङ्केति"।

**हौ** अव्य० ह्वे–डौ नि०। १सम्बोधने २आह्वाने च मेदि०।

**होड़** अनादरे गतौ च भ्वा० आ० सक० सेट् ऋदित् चङि न ह्रस्वः। होडते अहोडिष्ट।

**हौत्र** त्रि० होतुरिदम् उद्गा० अण्। तस्य भावः कर्म वा युवा० अण् वा। १होतृसम्बन्धिनि २तत्कर्मादौ न०।

**ह्नु** चौर्ये अदा० आत्म० सक० अनिट्। ह्नुते अह्नोष्ट।

**ह्मल** चलने भ्वा० प० अक० सेट्। ह्मलति अह्मालीत्। घटा०। प्रह्मलयति अनुपसर्गस्य वा ह्रस्वः।

**ह्यस्** अव्य० गतेऽहनि नि०। गतदिवसे अमरः।

**ह्यस्तन** त्रि० ह्यस्+भवार्थे ट्युल् तुट् च। गतदिवसभवे त्यप्। ह्यस्त्योऽप्यत्र त्रि०। [हृद्धिः। ह्लगति अह्लगीत्।

**ह्रग** संवरणे भ्वा० पर० सक० सेट् घटा० एदित् सिचि न

**ह्रद** पु० ह्राद–अच् नि०। १अगाधजलाशये अमरः। २किरणे रामाश्रमः। "ह्रदवारि वह्निजननं मधुरं कफवातहारि पथ्यञ्च" राजनि० तज्जलगुणा उक्ताः।

**ह्रदिनी** स्त्री ह्रदोऽस्त्यस्याम् इनि। नद्याम् अमरः।

**ह्रप** भाषणे चु० उ० सक० सेट्। ह्रापयति ते अजिह्रपत् त।

**ह्रस** रवे भ्वा० प० सक० सेट्। ह्रसति अह्रसीत् अह्रासीत्

**ह्रसिमन्** पु० ह्रस्वस्य भावः इमनिच् ह्रसादेशः। ह्रस्वतायाम्

**ह्रसिष्ठ** त्रि० अतिशयेन ह्रस्वः इष्ठन् ह्रसादेशः। अतिह्रस्वे

**ह्रसीयस्** त्रि० अतिशयेन ह्रस्वः ईयसुन् ह्रसादेशः। अतिह्रस्वे। स्त्रियां ङीप्।

**ह्रस्व** न० ह्रस–वन्। १परिमाणभेदे २तद्वति ३खर्वे च त्रि० अमरः। एकमात्राकालोच्चार्ये ४लघुवर्णे पु० राजनि०। ५क्षुद्रपर्ण्यां ६नागबलायां भूमिजम्बूवृक्षे स्त्री राजनि०।

**ह्रस्वकुश** पु० नित्यकर्म०। श्वेतकुशे राजनि०।

**ह्रस्वगर्भ** पु० ह्रस्वो गर्भो यस्य। कुशे रत्नमा०।

**ह्रस्वगवेधुका** स्त्री नि० कर्म०। नागबलायाम् अमरः।

**ह्रस्वजम्बू** स्त्री कर्म०। क्षुद्रजम्बूवृक्षे रत्नमा०।

**ह्रस्वदर्भ** पु० नित्यकर्म०। श्वेतकुशे राजनि०। [क्याम् राजनि०

**ह्रस्वदा** स्त्री ह्रस्वैरपि दीयते छिद्यते दो–खण्डने क। शल्ल-

**ह्रस्वपत्रक** पु० ह्रस्वं पत्रमस्य कप्। १नगजमधूके (मौल) २अश्वत्थाङ्गे स्त्री राजनि० कापि अत इत्त्वम्।

**ह्रस्वफला** स्त्री ह्रस्वं फलमस्याः। भूमिजम्बूवृक्षे राजनि०

**ह्रस्वमूल** पु० ह्रस्वं मूलमस्य। रक्तेक्षौ राजनि०। [अमरः।

**ह्रस्वशाखाशिफ** पु० ह्रस्वा शाखा शिफा च यस्य। क्षुपे

**ह्रस्वाग्नि** पु० ह्रस्वः अग्निरस्मात् ५ब०। अर्कवृक्षे शब्दच०।

**ह्रस्वाङ्ग** पु० ह्रस्वमङ्गमस्मात् ५ब०। १जीवकौषधे अमरः। ६ब०। वामने २खर्वे त्रि०। कर्म०। ह्रस्वे अङ्गे न०।

**ह्राद** स्वने भ्वा० आ० अक० सेट्। ह्रादते अह्रादिष्ट।

**ह्राद** पु० ह्राद–भावे घञ्। १शब्दे हेमच० अच्। २शब्दकारके त्रि० ३हिरण्यकशिपुपुत्रभेदे पु० पुराणम्।

**ह्रादिनी** स्त्री ह्राद–णिनि ङीप्। १विद्युति २वज्रे अमरः ३नद्याम् राजनि० ४शल्लक्याञ्च शब्दर० ५ह्रादविशिष्टे त्रि०

**ह्रास** पु० ह्रस–घञ्। १शब्दे त्रि० २अपचये च।

**ह्रिणी** लज्जायाम् कण्ड्वा० आ० अक० सेट्। ह्रिणीयते अह्रिणीयिष्ट।

**ह्रिणीया** स्त्री ह्रिणी–यक् भावे अ। लज्जायाम् अमरः। पृषो० ह्रिणिया इत्यपि तत्रार्थे भरतः। [ह्रेपयति ते।

**ह्री** लज्जायां जु० प० अक० अनिट्। जिह्रेति अह्रैषीत्। णिचि

**ह्री** स्त्री ह्री–सम्प० भावे क्विप्। लज्जायाम् अमरः।

**ह्रीका** स्त्री ह्री–कक्। १त्रासे उणा०। २लज्जायां त्रि० कौ वा रस्य लः तत्रार्थे।

**ह्रीकु** त्रि० ह्री–उन् कुक् च। १लज्जिते। २सज्जने ४जतुके ५त्रपुणि च उणा०। वा रस्य लः। [ह्रीत्।

**ह्रीच्छ** लज्जायाम् भ्वा० प० अक० सेट्। ह्रीच्छति अह्री-

**ह्रीजित** त्रि० ३त०। लज्जाशीले जटा०।

**ह्री(त)ण** त्रि० ह्री–क्त वा तस्य नः। लज्जिते अमरः।

**ह्रीवेर(ल)** न० ह्रिये लज्जायै वेरमङ्गमस्य क्षुद्रत्वात् पृषो० वा रस्य लः (बाला) क्षुपभेदे पृषो०। ह्रिवेर तत्रार्थे रस्य